# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर-दिसम्बर, २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ५** | गुणाः - ७० |
| विषयः – रामानुजवेदान्तः | **कोड – C.C.1.1.1** | समयः – ०३ तः ०६ पर्यन्तम् |
| दिनाङ्कः – ०९/१२/२०१६ | सन्दर्भग्रन्थः – यतीन्द्रमतदीपिका (१-६ अवताराः) | |

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ निम्नलिखितेषु द्वयोः उत्तरं लिखत।** ०८

(१) लक्षणस्थदोषत्रयस्य विवेचनं कुरुत।
(२) यतीन्द्रमतदीपिकाग्रन्थस्य मङ्गलाचरणं विलिख्य तस्यार्थं स्पष्टयत।
(३) प्रमालक्षणं यथाग्रन्थं विवेचयत।

**प्रश्नः – २ निम्नलिखितयोः कस्यचिद् एकस्य समीक्षात्मकम् उत्तरंलिखत।** ०८

(१) विशिष्टाद्वैतसिद्धान्तरीत्या पदार्थसमुद्देशं विशदयत
(२) प्रत्यक्षप्रमाणस्य प्रक्रियां यथाग्रन्थं निबन्धयत।

**प्रश्नः – ३ एकां टिप्पणीं लिखत।** ०२

(१) पञ्चधा ईश्वरः।
(२) विशिष्टाद्वैतशब्दार्थः।

**प्रश्नः – ४ अधोलिखितेषु कयोश्चिद् द्वयोः अतिलघूत्तरं लिखत** ०२

(१) करिशैलनाथः क?
(२) द्रव्यं कतिविधम्?
(३) प्रमालक्षणं किम्?
(४) किं नाम विपरीतज्ञानम्?

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५ निम्नलिखितेषु द्वयोरुत्तरं लिखत।** ०८

(१) अनुमानस्य अवयवपञ्चकस्य वर्णनं कुरुत।
(२) हेत्वाभासस्य लक्षणं विलिख्य असिद्धहेत्वाभासं यथाग्रन्थं स्पष्टयत।
(३) सम्पूर्णस्य वेदस्य प्रामाण्यविषये एकं निबन्धं लिखत

**प्रश्नः – ६ निम्नलिखितयोः कस्यचिद् एकस्य समीक्षात्मकम् उत्तरंलिखत।** ०८

(१) व्याप्तेः लक्षणं विलिख्य यथाग्रन्थं तस्याः प्रभेदान्विशदयत।
(२) यथाग्रन्थम् अनुमानस्य भेदद्वयम् उपपादयत।

**प्रश्नः – ७ निम्नलिखितेषु द्वयोरुत्तरं दीयताम्।** ०४

(१) उपाधिलक्षणं विलिख्य तस्योदाहरणं प्रदर्शयत।
(२) व्याप्यस्य सलक्षणं भेदान् लिखत।
(३) वेदाङ्गानां नामानि लिखत।
(४) किं नाम अर्थापत्तिः ?

प्रश्नः – ८ **अधोनिर्दिष्टेषु केषाञ्चित् पञ्चानाम् अतिलघूत्तरं यच्छत** ०५

(१) किं नाम अनुमितिः?
(२) व्याप्तिः कतिविधाः ?
(३) अनुमानं कतिविधम्?
(४) किं नाम उपमानम् ?
(५) यतीन्द्रमतदीपिकाकारः कः?
(६) यतीन्द्रमतदीपिकायां कति अवताराः सन्ति?
(७) श्रीभाष्यं केन प्रणीतम् ?

## तृतीयान्वितिः (Unit-3)

प्रश्नः – ९ **निम्नलिखितेषु द्वयोः उत्तरं दीयताम्** ०८

(१) यथाग्रन्थम् इन्द्रियनिरूपणं स्पष्टयत।
(२) तेजसः निरूपणं कुरुत।
(३) यतीन्द्रमतदीपिकाग्रन्थाधारेण पञ्चीकरणप्रक्रियां प्रदर्शयत।

प्रश्नः – १० **निम्नलिखितयोः कस्यचिद् एकस्य समीक्षात्मकम् उत्तरंलिखत।** ०८

(१) पञ्चतन्मात्राणां पञ्चमहभूतानां यथाग्रन्थं निरूपणं कुरुत
(२) श्रीभगवतः दिव्यमङ्गलविग्रहस्य सर्वाश्रयत्वस्य प्रतिपादनं कुरुत।

प्रश्नः – ११ **निम्नलिखितेषु द्वयोः उत्तरं दीयताम्।** ०४

(१) शरीरलक्षणं विलिख्य तस्य प्रभेदान् लिखत।
(२) कतिद्वीपवती पृथिवी ?
(३) किं नाम कालः ? सः कतिविधः?
(४) शुद्धसत्त्वस्य लक्षणद्वयं लिखत।

प्रश्नः – १२ **अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत** ०५

(१) किं नाम प्रमेयम् ?
(२) किं नाम द्रव्यम् ?
(३) अहङ्कारः कस्मात् उत्पद्यते ?
(४) प्राणः कतिविधः?
(५) अपां कति गुणाः भवन्ति?
(६) नित्यविभूतेः निरूपणं कस्मिन् अवतारे कृतम् ?
(७) कति मनवः ब्रह्मणः एकं दिनं भवति ?

***

## Answer Key

कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम् – ५** गुणाः - ७०

विषयः – रामानुजवेदान्तः **कोड – C.C.1.1.1** समयः – ०३ तः ०६ पर्यन्तम्

दिनाङ्कः – ०९/१२/२०१६ सन्दर्भग्रन्थः – यतीन्द्रमतदीपिका (१-६ अवताराः)

### प्रथमान्वितिः (Unit-1)

**प्रश्नः – ३**
1. परव्यूहविभवान्तर्याम्यर्चावतारभेदात्।
2. द्वयोर्भावो द्विता। द्वितैव द्वैतम्। न द्वैतम् अद्वैतम्। विशिष्टञ्चेदमद्वैतं विशिष्टाद्वैतम्। वैशिष्ट्यञ्च चिदचिदोः शरीरशरीरीभावसम्बन्धेन।

**प्रश्नः – ४**
1. श्रीवेङ्कटेशः
2. द्विविधम्। जडमजडम्।
3. यथावस्थितव्यवहारानुगुणं ज्ञानं प्रमा।
4. विपरीतज्ञानं नाम धर्मिविपर्यासः ।ष्ह्च्

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ७**
1. साध्यव्यापकत्वे सति साधनाव्यापकत्वम् उपाधिः। यथा – वह्निना धूमे साध्यमाने आर्द्रेन्धनसंयोगः
2. व्याप्यं साधनम्। अथवा अनधिकदेशकलनियमं व्याप्यम्। तद्विविधम्– अन्वयव्यतिरेके-केवलान्वयिभेदात्।
3. छन्दः, कल्पः शिक्षा, निरुक्तम्, ज्यौतिषम्, व्याकरणं च।
4. अर्थापत्तिर्नाम दिवा अभुञ्जानस्य पुरुषस्य पीनत्वदर्शनाद्रात्रिभोजनकल्पना।

**प्रश्नः – ८**
1. व्याप्यस्य व्याप्यत्वानुसन्धानात् व्यापकविशेषप्रमितिः अनुमितिः
2. व्याप्तिः द्विविधा – अन्वयव्यतिरेकभेदात्।
3. अनुमानम् द्विधम्– स्वार्थं परार्थञ्च।
4. अतिदेशवाक्यार्थस्मरणसहकृतसादृश्यविशिष्टपिण्डज्ञानम् उपमानम्।
5. श्रीनिवासाचार्यः?
6. १० अवताराः।
7. श्रीमद्रामानुजाचार्येण।

### तृतीयान्वितिः (Unit-3)

**प्रश्नः – ११**
1. शरीरं नाम चेतनं प्रत्याधेयत्वविधेयत्वशेषत्वनियमैरपृथिक्सद्धो द्रव्यविशेषः। तद्विविधम्– नित्यमनित्यमिति भेदात्।
2. सप्तद्वीपवती पृथिवी।
3. गुणत्रयरहितो जडद्रव्यविशेषः। सः त्रिविधः।
4. त्रिगुणद्रव्यव्यतिरिक्तत्वे सति सत्त्ववत्म्। निःशेषाविद्यानिवृत्तिदेशविजातीयान्यत्वं वा

**प्रश्नः – १२**
1. प्रकर्षेण मेयम् प्रमेयम्।
2. उपदानं द्रव्यम्।
3. महतः।
4. पञ्चविधः। प्राणापानव्यानोदानसमानभेदात्।
5. चत्वारः गुणाः ।शब्दस्पर्शरूपरसाः।
6. षष्ठावतारे।
7. चतुर्दश मनवः।